"करगृहीतपात्रेण कृत्वा मूत्रपुरीषके ।
मूत्रतुल्यन्तु पानीयं पीत्वा चान्द्रायणञ्चरेत् ॥"
इति हृहद्यमः ॥ * ॥

गृहीतजलपात्रस्य मूत्रोत्सर्गे दोषो यथा,—
"वारिपात्रं करे धृत्वा मूत्रं त्यजति यो नरः ।
सुरापानसमं पापं तज्जलं मदिरासमम् ॥"
इति कर्म्मलोचनम् ॥ * ॥

सशब्दमूत्रस्य दोषो यथा,—
"निःस्वाः सशब्दमूत्राः स्युर्नृपा निःशब्दधारया ।
भोगाढ्याः समषठरा निःस्वाः स्युर्घट-
सन्निभाः ॥"
इति गारुडे ६१ अध्यायः ॥ * ॥

"विण्मूत्रान्नाजमूत्रेण चौरव्याघ्रादिरक्षणम् ।"
इति तत्रैव १८८ अध्यायः ॥ * ॥ अथ गोमूत्र-गुणाः । तीक्ष्णत्वम् । उष्णत्वम् । लवणत्वम् । पित्तकारित्वम् । कटुत्वम् । लघुत्वम् । रूक्षत्वम् । कण्डुदराणाहशोथार्शोविषकुष्ठनाशित्वञ्च । इति राजवल्लभः ।

मूत्रकृच्छ्रं, क्ली, (मूत्रे कृच्छ्रम् । मूत्रजन्यं कृच्छ्रमिति वा ।) रोगविशेषः । तत्पर्य्यायः । मूत्ररोधः २ अश्मरी ३ कृच्छ्रम् ४ । इति राजनिर्घण्टः ॥ * ॥ अथ मूत्रकृच्छ्राधिकारः । तत्र मूत्रकृच्छ्रस्य विप्रकृष्टं निदानमाह ।

"व्यायामतीक्ष्णौषधरूक्षमद्य-
प्रसङ्गनृत्यद्रुतपृष्ठयानात् ।
आनूपमत्स्याध्यशनादजीर्णात्
स्युर्मूत्रकृच्छ्राणि नृणां तथाष्टौ ॥"

तीक्ष्णौषधं राजिकाशूरणादियुक्तम् । रूक्षेति मद्यविशेषणम् । प्रसङ्गः सततं सेवा । नृत्यं नर्त्तनम् । नित्येति द्विविधः पाठः । द्रुतपृष्ठयानात् अश्वादिना गमनात् । आनूपं प्रचुरजलदेशभवं भक्ष्यम् । अष्टौ वातिकपैत्तिकश्लैष्मिकसान्निपातिकशल्यजपुरीषजशुक्रजाश्मरीजानि । तस्य संप्राप्तिपूर्व्वकं लक्षणमाह ।

"पृथङ्मलाः स्वैः कुपिता निदानैः
सर्व्वेऽथवा कोपमुपेत्य वस्तौ ।
मूत्रस्य मार्गं परिपीडयन्ति
यदा तदा मूत्रयतीह कृच्छ्रात् ॥"

तेषु वातिकमाह ।
"तीव्रा रुजो वङ्क्षणवस्तिमेढ्रे
स्वल्पं मुहुर्मूत्रयतीह वातात् ।"
तीव्रा मारणात्मिका वङ्क्षणवस्तिमेढ्राणामन्तरालवर्त्ती ॥ * ॥ पैत्तिकमाह ।
"पीतं सरक्तं सरुजं सदाहं
कृच्छ्रं मुहुर्मूत्रयतीह पित्तात् ।"
कृच्छ्रमिति क्रियाविशेषणम् । श्लैष्मिकमाह ।
"वस्तेः सलिङ्गस्य गुरुत्वशोथौ
मूत्रं सपिच्छं कफमूत्रकृच्छ्रे ।"
सपिच्छं पिच्छिलम् । सान्निपातिकमाह ।
"सर्व्वाणि रूपाणि च सन्निपातात्
भवन्ति तत् कृच्छ्रतमं हि कृच्छ्रम् ।"
कृच्छ्रं मूत्रकृच्छ्रम् ॥ * ॥ शल्यजमाह ।

"मूत्रवाहिषु शल्येन क्षतेष्वभिहतेषु वा ।
मूत्रकृच्छ्रं तदाघाताज्जायते भृशदारुणम् ।
वातकृच्छ्रेण तुल्यानि तस्य लिङ्गानि निर्द्दिशेत् ।"
मूत्रवाहिषु स्रोतःसु । शल्येन कण्टकेन । क्षतेषु सक्षतीकृतेषु अथवा अभिहतेषु मुद्गरादिभिरभिहतेषु । तदाघातात् मूत्रमार्गाघातात् मूत्रकृच्छ्रं जायते । भृशदारुणं मारकं तस्य शल्यजस्य ॥ * ॥ पुरीषजमाह ।
"शकृतस्तु प्रतीघाताद्वायुर्विगुणतां गतः ।
आध्मानं वातशूलञ्च मूत्रकृच्छ्रं करोति च ॥"
प्रतीघातात् निरोधात् । विगुणतां दुष्टताम् । शुक्रजमाह ।
"शुक्रदोषैरुपहते मूत्रमार्गे विधारिते ।
सशुक्रं मूत्रयेत् कृच्छ्राद्वस्तिमेहनशूलवान् ॥"
उपहते दूषिते ॥ * ॥ अश्मरीजमाह । अश्मरीहेतुकमपि मूत्रकृच्छ्रमुदाहृतम् । सुश्रुते शर्कराजमपि मूत्रकृच्छ्रमुक्तमत्र तु तस्य नवसंख्यानिरासार्थमश्मरीशर्करयोः साम्यमाह ।
"अश्मरी शर्करा चैव तुल्यसम्भवलक्षणे ।
विशेषणं शर्करायाः शृणु कीर्त्तयतो मम ॥"
सम्भवः कारणम् ।
"पच्यमानाश्मरी पित्ताच्छोष्यमाणा च
वायुना ।
विमुक्तकफसन्धाना क्षरन्ती शर्करा मता ॥"
पित्तेन पच्यमाना मूत्रशुक्रश्लेष्मसंहतिः प्रथमं पित्तेन बन्धनकर्म्मणा पच्यमाना । पश्चाद्वातेन शोषिता कफेनाश्लिष्टा अश्मरी । सैव विमुक्तकफसन्धाना त्यक्तकफाश्लेषा सती शर्करारूपा मूत्रमार्गात् क्षरन्ती शर्करा मता । एतावता किञ्चिदेव भेदः ॥ * ॥ शर्कराया उपद्रवानाह ।
"हृत्पीडा वेपथुः शूलं कुक्षावग्निश्च दुर्ब्बलः ।
तया भवति मूर्च्छा च मूत्रकृच्छ्रञ्च दारुणम् ॥"
शूलं कुक्षावित्यन्वयः । तया शर्करया ॥ * ॥
अथ मूत्रकृच्छ्रस्य चिकित्सा ।

"त्रिकण्टकारग्वधदर्भकाश-
यवासधात्रीगिरिभेदपथ्याः ।
निघ्नन्ति पीता मधुनाश्मरीञ्च
समीपगस्त्योरपि मूत्रकृच्छ्रम् ॥"

त्रिकण्टकादिक्वाथः ॥ १ ॥

"एलाश्मभेदकशिलाजतुगोक्षुराणा-
मेर्व्वारुबीजनवचोत्तमकुङ्कुमानाम् ।
चूर्णानि तण्डुलजले तुलितानि पीत्वा
प्रत्यग्रमद्युरपि जीवति मूत्रकृच्छ्री ॥"

एलादिचूर्णम् ॥ २ ॥

"अयोरजः श्लक्ष्णपिष्टं मधुना सह योजितम् ।
मूत्रकृच्छ्रं निहन्त्याशु संलीढं दिवसत्रयात् ॥३॥
गुडेन मिश्रितं क्षीरं कदुष्णं कामतः पिबेत् ।
मूत्रकृच्छ्रेषु सर्व्वेषु शर्करायाश्च निश्चयः ॥४॥
धात्रीरसञ्चेक्षुरसं पिबेद्वा
कृच्छ्रे सरक्ते मधुना विमिश्रम् ।
शल्याभिघातोत्थितमूत्रकृच्छ्रे
कार्य्या क्रिया मारुतकृच्छ्रतुल्या ॥५॥
क्वाथो गोक्षुरबीजस्य यवक्षारसमन्वितः ।
पीतः प्रशमयत्येव कृच्छ्रं विड्धारणोत्थितम् ॥६॥
त्रिफलायाः सुपिष्टायाः कल्कं कोलसमन्वितम् ।
वारिणा लवणीकृत्य पिबेन्मूत्ररुजापहम् ॥"७॥
कोलं बदरम् ।
गुडमामलकं वृष्यं श्रमघ्नं तर्पणं प्रियम् ।
पित्तासृग्दाहशूलघ्नं मूत्रकृच्छ्रहरं परम् ॥ ८ ॥
सपादशाणतुलितो यवक्षारः सितायुतः ।
भक्षितो नाशयत्येव मूत्रकृच्छ्रं न संशयः ॥९॥
द्राक्षासितोपलाकल्कः पीतः कर्षमितो नरैः ।
मस्तुना पलमात्रेण मूत्रकृच्छ्रं व्यपोहति ॥१०॥
समूलगोक्षुरक्वाथः सितामाक्षिकसंयुतः ।
नाशयेन्मूत्रकृच्छ्राणि तथैवोष्णसमीरणम् ॥"११॥
उष्णसमीरणं उष्णवातं मूत्राघातविशेषम् । इति भावप्रकाशः ॥ (तथास्य चिकित्साप्रकारान्तरम् ।
"सुशीतलं जलं कर्षमात्रं स्यात् मूत्रकृच्छ्रहृत् ।
दध्यम्बुना च संमिश्रमयश्चूर्णं सुखप्रदम् ॥
मूत्रकृच्छ्रे यवक्षारचूर्णं हिङ्गुप्रयोजितम् ।
कुष्माण्डञ्च समादाय शर्करासहितं पिबेत् ॥
यो हि त्रिदोषसम्भूतमूत्रकृच्छ्रनिवारणः ॥"
"आरग्वधफलं मूलं दुरालभा धान्यकशता-
वर्य्यः ।
पाषाणभेदपथ्ये क्वाथोऽयं मूत्रकृच्छ्रे स्यात् ॥"
इति हारीते चिकित्सितस्थाने २९ अध्याये ॥
अथात्र पथ्यानि ।

"अथो यथादोषमयं गणोऽपि
पुरातना लोहितशालयश्च ।
तक्रं पयो दध्यपि गोप्रसूतं
धन्वामिषं मुद्गरसाः सिता च ॥
पुराणकुष्माण्डफलं पटोलं
मृद्वार्द्रकं गोक्षुरकः कुमारी ।
गुवाकखर्ज्जूरकनारिकेल-
तालद्रुमाणाञ्च शिरांसि पथ्या ॥
तालास्थिमज्जात्रपुषं त्रुटिश्च
शीतानि पानान्यशनानि चापि ।
प्रनीरनीरं हिमवालुका च
मिश्रं नृणां स्यात् सति मूत्रकृच्छ्रे ॥"

अथापथ्यानि ।

"मद्यं श्रमं निधुवनं गजवाजियानं
सर्व्वं विरुद्धमशनं विषमाशनञ्च ।
ताम्बूलमत्स्यलवणार्द्रकतैलभृष्टं
पिण्याकहिङ्गुतिलसर्षपवेगरोधान् ॥
माषान् करीरमतितीक्ष्णविदाहिरूक्ष-
मम्लञ्च मुञ्चतु जनः सति मूत्रकृच्छ्रे ॥"

इति वैद्यकपथ्यापथ्यविधिग्रन्थे मूत्रकृच्छ्राधिकारे ॥)

मूत्रदोषः, पुं, (मूत्रस्य दोषो यस्मात् ।) प्रमेहः । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते । सूत्रस्थाने ३८ अः ।
"वरुणकादिरित्येष गणोऽनिलविनाशनः ।
मूत्रदोषहरो हृद्यः पिपासाघ्नो रुचिप्रदः ॥"